# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – जुलाई - २०२१

| | | |
|---|---|---|
| **कक्षा – आचार्य – २** | **प्रश्नपत्रम् – २** | **गुणाः – ५०** |
| **विषयः – फलितज्योतिषम्** | **सत्रम् – ४** | **समयः – १० तः १२** |
| **दिनाङ्कः – १४/०७/२०२१** | **सन्दर्भग्रन्थः – हस्तसञ्जीवनम्, ज्योतिषशास्त्रस्येतिहासः** | |

सूचना - **निम्नलिखितेषु एकादशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः। प्रत्येकं प्रश्नस्य समानगुणाः। (१०)**

**प्रश्नः १ अधोलिखितेषु द्वयोः पद्ययोः व्याख्यां कुरुत ।**

१ पितृरेखा भवेद्गङ्गा मातृरेखा सरस्वती ।
आयुरेखात्र यमुना तत्सङ्गस्तीर्थमक्षयम् ॥

२ अनामिका च सावित्री गौरी भगवती शिवा ।
कनीनिका कनिष्ठान्या लघुस्तारा च काञ्चनी ॥

३ दिनमानमपि ज्ञेयं त्र्यंशस्पर्शेन दुर्दिने ।
या तिथिः घटी वाच्या ज्योतिषेऽपि च सम्मता ॥

४ नष्टं मे कू गतं वस्तु इति ज्ञेये करं स्पृशेत् ।
नष्टस्य दिनगं गर्भे दत्ता यद्दिशि वस्तुभम् ॥

**प्रश्नः २** हस्ते तिथ्यादिनिरूपणं क्रियताम् ।

**प्रश्नः ३** हस्ते नक्षत्रनिरूपणं क्रियताम् ।

**प्रश्नः ४** नष्टवस्तूनां ज्ञानं यथाशास्त्रं वर्णनं कुरुत ।

**प्रश्नः ५** भाग्यरेखाफलविचारः क्रियताम् ।

**प्रश्नः ६ अधोलिखितेषु द्वयोः पद्ययोः व्याख्या कार्या ।**

१ भाग्यरेखा वामहस्ते ज्ञेया तत्रैव सन्ततिः ।
सोदरोत्था सपत्नीजा दक्षिणे करभे स्मृता ॥

२ पीठे या ऊर्ध्वरेखास्ता जाररेखा उदाहृता ।
वयस्या दक्षिणे वक्रे कन्दे ज्येष्ठाश्च देवराः ॥

३ स्थानद्रव्यादियोगेन शुभमप्यशुभं क्वचित् ।
अशुभं वा शुभं ज्ञेयं सधियाभ्यासशीलनात् ॥

४ अङ्कुशं कुण्डलं चक्रं यस्या पाणितले भवेत् ।
पुत्रं प्रसूयते नारी नरेन्द्रं लभते पतिम् ॥

**प्रश्नः ७** पुंस्त्रियोः नखलक्षणं फलञ्च विस्तारेण लिखत ।

**प्रश्नः ८** ज्योतिषशास्त्रस्य प्रवर्तकाः के ? सश्लोकं वर्णनं कुरुत ।

**प्रश्नः ९** ज्योतिषशास्त्रस्य परिचयः कार्यः ।

**प्रश्नः १०** ज्योतिषशास्त्रस्योत्पत्तिविषये विस्तारेण वर्णनं कुरुत ।
अथवा
दैवज्ञभास्कराचार्यस्य परिचयो देयः ।

**प्रश्नः ११** **दशानां प्रश्नानां लघूत्तराणि लिखत ।**

१ कति स्कन्धात्मकं ज्योतिषशास्त्रम् ?
२ हस्तसञ्जीवनम् ग्रन्थस्य लेखकः कः ?
३ सिद्धान्तस्कन्धस्य अपरं नाम किम् ?
४ ज्योतिषशास्त्रं वेदस्य किम् अङ्गम् अस्ति ?
५ नीलाम्बरः कस्मिन् काले आसीत् ?
६ ज्योतिषं कीदृशं शास्त्रम् ?
७ बापूदेवशास्त्री कस्य आत्मजः ?
८ ताजिकनीलकण्ठी कस्य ग्रन्थः वर्तते ?
९ मुहूर्ततत्त्वटीका केन लिखिता ?
१० आर्यभट्टियं कस्य मुख्यरचना वर्तते ?
११ भावकुतूहलं कस्मिन् स्कन्धे आयाति ?
१२ बृहत्संहिताग्रन्थस्य रचनाकारः कः ?
१३ वराहमिहिरस्य पुत्रस्य ग्रन्थः कः ?
१४ भास्कराचार्यस्य सिद्धान्तग्रन्थः कः ?
१५ ज्योतिषे पञ्चाङ्गानि कानि ?

****